श्री महालक्ष्मी स्तोत्रं

सर्वसौभाग्यरूपा त्वं सर्वसंपत्स्वरूपिणी ।
सर्वकल्याणरूपा त्वं महालक्ष्मि नमोऽस्तु ते ॥1॥

जनश्रीस्त्वं वनश्रीस्त्वं मंगलश्रीः स्वभावतः ।
ब्रह्मश्रीश्च मोक्षश्रीश्च महालक्ष्मि नमोऽस्तु ते ॥2॥

शांतिस्तुष्टिस्तथापुष्टिर्मेधा कीर्तिश्च सन्मतिः ।
दैवीसंपत्स्वरूपा त्वं महालक्ष्मि नमोऽस्तु ते ॥3॥

मोक्षसाधनसंपत्तिरायुरारोग्यसंसृतिः ।
सर्वैश्वर्यस्वरूपा त्वं महालक्ष्मि नमोऽस्तु ते ॥4॥

भक्तियोगा ब्रह्मनिष्ठात्वमेवैकाखिलेश्वरी ।
तदैव ब्रह्मरूपा च महालक्ष्मि नमोऽस्तु ते ॥5॥

सच्चिदानंदरूपा त्वं जगन्माता जगत्पिता ।
विष्णुब्रह्ममहेशास्त्वं महालक्ष्मि नमोऽस्तु ते ॥6॥

यतो हि जायते विश्वं यतश्च परिपाल्यते ।
यस्मिन् संलीयते ह्यंते महालक्ष्मि नमोऽस्तु ते ॥7॥

यच्च किंचित् सुष्ठुजातं यच्च किंचित् शुभं सुखं ।
तदेवैकात्मरूपेण महालक्ष्मि नमोऽस्तु ते ॥8॥

वेदस्मृतिः सदाचार आत्मतुष्टिर्गुरोः कृपा ।
सर्वोपास्यस्वरूपा त्वं महालक्ष्मि नमोऽस्तु ते ॥9॥

वशमेवाद्वयं ब्रह्म नित्यानंदैकमात्रतः ।
भेदबुद्धिमपास्यैवं महालक्ष्मि नमोऽस्तु ते ॥10॥

इति श्री श्रीधरस्वामीविरचितं महालक्ष्मीस्तोत्रं संपूर्णं ॥